श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

श्रीवात्स्यवरदगुरुभिरनुगृहीतं

# ॥ श्री परमार्थ श्लोकद्वयम् ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the **skt** font.

श्रीः

श्रीमते रामानुजाय नमः

# ॥ श्री परमार्थ श्लोकद्वयम् ॥

वन्देऽहं वरदार्यं तं वत्साभिजनभूषणम्।
भाष्यामृतप्रदानाद्यः सञ्जीवयति मामपि॥

सत्सङ्गात् भव निःस्पृहो गुरुमुखात् श्रीशं प्रपद्यात्मवान्
प्रारब्धं परिभुज्य कर्मशकलं प्रक्षीणकर्मान्तरः।
न्यासादेव निरङ्कुशेश्वरदयानिर्लूनमायान्वयो
हार्दानुग्रहलब्ध मध्यधमनिद्वारा बहिर्निर्गतः॥ १ ॥

मुक्तोऽर्चिर्दिनपूर्वपक्षषडुदङ्मासाब्दवातांशुमत्
ग्लौ विद्युत्वरुणेन्द्रधातृ महितः सीमान्तसिन्ध्वाप्लुतः।
श्रीवैकुण्ठमुपेत्य नित्यमजडं तस्मिन् परब्रह्मणः
सायुज्यं समवाप्य नन्दति समं तेनैव धन्यः पुमान्॥ २ ॥

प्रातर्नित्यानुसन्धेयं परमार्थं मुमुक्षुभिः।
श्लोकद्वयेन संक्षिप्तं सुव्यक्तं वरदोऽब्रवीत्॥ ३ ॥

॥ इति श्री परमार्थ श्लोकद्वयम् समाप्तम् ॥